संस्कृत-वार्ता:

21.04.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना उक्तं यत् अद्य विश्वशान्त्यै सम्पूर्णं विश्वं भारतं प्रति पश्यति, तेन भगवतः महावीरस्य जयन्त्यवसरे पञ्चाशदुत्तर-पञ्चविंशति-शततमस्य भगवान्-महावीर-निर्वाण-महोत्सवस्य उद्घाटनं च विहितम् ।

· लोकसभायाः द्वितीयचरणीय-निर्वाचनस्य प्रचाराः तीव्रगत्या प्रचलन्ति, द्वितीयचरणाय प्रचाराः बुधवासरे समाप्यन्ते ।

· राष्ट्रीयपात्रतापरीक्षायाः UGC-NET इत्यस्य पञ्जीकरणं आरब्धम्, अन्तिमतिथिः मई मासस्य दशम-दिनाङ्कः अस्ति ।

· अमेरिकी-प्रतिनिधिसभया युक्रेन, इजरायल् तथा ताइवान देशानां कृते पञ्च-नवतिः अर्बुद-डॉलरेत्यस्य विधायी-देयराशेः सुरक्षा-सहायतायाश्च अनुमोदनं कृतम् ।

· आई.पि.एल् क्रिकेट् प्रतिस्पर्धा-मालिकायां कोल्कत्ता नैट् रैडर्स् दलेन रायल् चलेंजर्स बेंगलूरु दलाय त्रयोविंशत्युत्तर द्विशतम् धावनांकानां लक्ष्यं दत्तम् ।

<u>प्रधानमन्त्री</u>

प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना अद्य नवीदिल्लीनगरस्य भारतमण्डपे भगवतः महावीरस्य जयन्त्यवसरे पञ्चाशदुत्तर-पञ्चविंशति-शततमस्य भगवान्-महावीर-निर्वाण-महोत्सवस्य उद्घाटनं कृतम् । अस्मिन् अवसरे श्रीमोदिना स्मारकमुद्रायाः डाकचीटिकायाः च विमोचनं कृतम् । प्रधानमन्त्रिणा उक्तं यत् भारतं न केवलं विश्वस्य प्राचीनतमा जीवितसभ्यता, अपि तु मानवतायाः आश्रयस्थानमपि अस्ति । सः अवदत् यत् भारतीयचिन्तनं केवलं स्वस्य कृते एव नास्ति अपि तु सर्वेषां कृते हितकरं भवति । श्री-मोदिना उक्तं यत् अद्य भारतं सम्पूर्णे विश्वे सत्यम् तथा अहिंसां

पूर्णविश्वासेन प्रवर्धयति। श्री-मोदिना उक्तं, अद्यत्वे यत्र विश्वस्य बहवः देशाः संघर्षं कुर्वन्ति, युद्धं च कुर्वन्ति, अस्मिन् समये भारतस्य तीर्थङ्कराणां शिक्षायाः महत्त्वं अधिकं जातमस्ति। सः अवदत् यत् अद्य विश्वशान्त्यै सम्पूर्णं विश्वं भारतं प्रति पश्यति । श्रीमोदी अवोचत् यत् नूतनभारतस्य अस्याः नूतनायाः भूमिकायाः श्रेयः अस्माकं वर्धमान-क्षमतायाः विदेशनीतेः च फलस्वरूपम् अस्ति। अस्मिन् अवसरे केन्द्रीयसंस्कृतिमन्त्री अर्जुनराममेघवालः अवदत् यत् भगवतः महावीरस्य दर्शनं अद्यत्वे अपि प्रासंगिकम् अस्ति अथ जीव, जीवनं च देहि इति सिद्धान्तः अद्यत्वे अपि महत्त्वपूर्णः समयसापेक्षः च अस्ति। तेनोक्तं यत्, भगवता महावीरेण अहिंसा, सत्यम्, निस्स्वार्थता, ब्रह्मचर्यम्, त्यागः च इत्येतेषां सिद्धान्तं दत्त्वा शान्तिपूर्णं सहजीवनं विश्वभ्रातृत्वं च प्रवर्धितम् ।

निर्वाचनप्रचारः-

शुक्रवासरे सामान्यनिर्वाचनस्य प्रथमचरणीय-मतदानस्य सम्पूर्त्यनन्तरमेव अवशिष्टचरणानां निर्वाचनप्रचारः तीव्रः अभवत्। महागठबन्धन-एनडीए-आदिसहितानां समस्त-राजनैतिकदलानां वरिष्ठनेतारः शीर्ष-प्रचारकाश्च मतदातृन् आकर्षयितुं देशे सर्वत्र बहुविधाः सभाः आयोजयन्ति। द्वितीयचरणीय निर्वाचन-प्रचाराणां कृते बुधवासरं यावदेव कालो विद्यते । प्रचाराभियानानां समाप्त्यै चतुर्दिनानि एव अवशिष्टानि सन्ति, अतः नेतारः सर्वविध-प्रयास-रताः सन्ति । अस्मिन् चरणे केरलस्य सर्वाणि विंशतिः लोकसभासनेषु , कर्णाटकस्य अष्टाविंशति-आसनेषु चतुर्दश-आसनानां कृते, राजस्थानस्य अवशिष्टेषु त्रयोदश-आसनेषु , उत्तरप्रदेश-महाराष्ट्रयोः च अष्टाष्ट आसनेषु, मध्यप्रदेशे सप्त आसनानां कृते, असम-बिहारयोः पञ्च-पञ्च आसनेषु, पश्चिमबङ्ग-छत्तीसगढयोः त्रीणि-त्रीणि आसनेषु, त्रिपुरा-जम्मू-कश्मीरयोः च एकैकं आसनस्य कृते मतदानं भविष्यति ।

युजिसि-नेट्

विश्वविद्यालय-अनुदान-आयोगस्य राष्ट्रियपात्रतापरीक्षायाः (NET) इत्यस्य पञ्जीकरणं राष्ट्रियपरीक्षणसंस्थायाः (NTA) जालपुटे आरब्धम् अस्ति। अवधेयं यत् इयं परीक्षा अस्मिन् वर्षे जूनमासस्य षोडष-दिनाङ्के भविष्यति। पञ्जीकरणं मई-मासस्य दश दिनाङ्कपर्यन्तं कर्तुं शक्यते। शुल्कपूर्तेः अन्तिमतिथिः मई-मासस्य द्वादश-दिनाङ्कः अस्ति । नेट परीक्षायाम् उत्तीर्णतां प्राप्य कनिष्ठ-शेध-छत्रवृत्तिं प्राप्तुं शक्यते अथ सहायक-आचार्य-पदे नियुक्त्यर्थं योग्यता च प्राप्यते ।

छात्राः अस्याः परीक्षायाः आधारेण त्र्यशीति-विषयेषु पी.एच्.डी. प्रवेशं प्राप्तुं शक्नुवन्ति । अस्याः परीक्षायाः कृते एकमेव आवेदनपत्रं पूरयितुं अनुमतिः भविष्यति ।

<u>यु.एस्</u>

अमेरिकी-प्रतिनिधिसभया युक्रेन, इजरायल् तथा ताइवान देशानां कृते पञ्च-नवतिः अर्बुद-डॉलरेत्यस्य विधायी-देयराशेः सुरक्षा-सहायतायाश्च अनुमोदनं कृतम् । अस्मिन् आगामिसप्ताहे प्रतिनिधिसभा विधेयकं पारितार्थं स्वीकुर्यात् इति अपेक्षा अस्ति । राष्ट्रपतिः जो बाइडेन् देयराशेः प्राप्यमाण-मात्रेण हस्ताक्षरं करिष्यामि इति प्रतिज्ञां कृतवान् । विधेयकानुसारं युक्रेनदेशे द्वन्द्वस्य निवारणाय षष्टि दशमलव चतुरशीतिः अर्बुद-डॉलर-राशिः प्रदत्तः भविष्यति, यत्र अमेरिकीशस्त्राणि, संग्रहणम्, सुविधाः च पुनः पूरयितुं त्रयोविंशतिः अर्बुद-डॉलरराशिः प्रदत्तः भविष्यति, इजरायलस्य कृते षड्विंशतिः अर्बुद-डॉलर-राशिः, तथा गाजादेशस्य मानवीयसाहाय्यार्थं नव दशमलव एकार्बुद- डॉलरराशिः, तथा ताइवानसहितस्य भारत-प्रशांतक्षेत्रस्य कृते अष्ट दशमलव द्वादश अर्बुद-डॉलर्-रूप्यकाणि प्रदत्तानि भविष्यन्ति ।

<u>राष्ट्रपति-उपराष्ट्रपति-प्रधानमन्त्री-महावीरः</u> -

राष्ट्रपतिपदासीनया द्रौपदीमुर्मू-वर्यया, उपराष्ट्रपतिना जगदीप-धनखड़ेन, प्रधानमन्त्रिणा नरेन्द्रमोदिना च अद्य भगवतः महावीरस्य जयन्त्यवसरे देशवासिभ्यः शुभकामनाः प्रदत्ताः। राष्ट्रपतिना स्वसन्देशे नागरिकेभ्यः आग्रहः कृतः यत्, ते भगवतः महावीरस्य शिक्षां अनुसृत्य सर्वेषां जीवानां हिताय कार्यं कर्तुं प्रतिज्ञां कुर्युः । सा प्रोक्तवती यत्, भगवतः महावीरस्य संयम-नैतिकता-अहिंसा-अधारणा-उपदेशाः अद्यत्वे अपि प्रासंगिकाः सन्ति। उपराष्ट्रपतिः जगदीप धनखडः अवदत्, यत् भगवान् महावीरः अस्मान् शान्तियुतस्य, सौहार्दपूर्णस्य, समृद्धस्य च समाजस्य निर्मणाय मार्गं प्रदर्शितवान् । धनखड़महोदयः नागरिकान् भगवतः महावीरस्य आदर्शानां प्रति प्रतिबद्धतां प्रदर्शितुं आग्रहं कृतवान् । प्रधानमन्त्रिणा उक्तं यत् शान्ति-संयम-सद्भावनया-सम्बद्धाः भगवतः महावीरस्य सन्देशाः विकसित-भारतस्य निर्माणे देशस्य कृते प्रेरणास्पदाः सन्ति ।

## कांग्रेस- सीईसी :

अद्य नवदिल्ल्याः कांग्रेस-मुख्यालये कांग्रेस-केन्द्रीय-निर्वाचन-समित्याः लोकसभा-निर्वाचन-सम्बद्धोपवेशनम् अभवत् । उपवेशने दलाध्यक्ष: मल्लिकार्जुन खड़गे, कांग्रेस-संसदीय-दलाध्यक्षया सोनिया-गांधिना सह अन्येपि वरिष्ठनेतारः उपस्थिताः आसन् । पञ्जाबराज्यस्य वरिष्ठाः दलनेतारः अपि सभायां उपस्थिताः आसन्।

## आई.पी.एल् क्रिकेट्

आई.पि.एल् क्रिकेट् प्रतिस्पर्धा-मालिकायां कोल्कत्तायाः ईडन-गार्डन्स् इत्यत्र कोल्कत्ता नैट् रैडर्स् अथ रायल् चलेंजर्स बेंगलूरु इत्येतयोः दलयोः मध्ये प्रतिद्वन्द्वं प्रचलति । कोल्कत्ता नैट् रैडर्स् दलेन रायल् चलेंजर्स बेंगलूरु दलाय त्रयोविंशत्युत्तर द्विशतम् धावनांकानां लक्ष्यं दत्तम् । पूर्वं रायल् चलेंजर्स बेंगलूरु दलेन पणकं विजित्य क्षेत्ररक्षणं चितम् । कोल्कत्ता नैट् रैडर्स् दलेन विंशति-क्षेपचक्रेषु षड्-क्रीडकहानौ द्वाविंशत्युत्तर द्विशतम् धावनांकाः समार्जिताः । अन्यत्र चण्डिगढस्य मुल्लनपुर-स्थितस्य महाराजा-यादविन्द्र-सिंह-अन्ताराष्ट्रिय-क्रिकेट्-क्रीडांगणे, सायं सार्धसप्तवादने, पंजाब किंग्स् अथ गुजरात टाईटान्स् दलयोः मध्ये प्रतिद्वन्द्वं भविष्यति ।

।। इति वार्ता: ।।